वराह मिहिरोक्तो नक्षत्रभेदेन देशविशेषाणां शुभाशु-भबोधको यन्त्रभेदे स च वृ० सं० १४ अध्यायः । यथा "नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा । भारतवर्षे मध्यात् प्रागादि विभाजिता देशाः । १भद्रारिमेदमाण्डव्य साल्वनीपोज्जिहानसङ्ख्याताः । मरुवत्सघोषयामुनसारस्वत-मत्स्यमाध्यमिकाः । माथुरकोपज्योतिष धर्मारण्यानि शूरसेनाश्च । गौरग्रीवोद्देहिक पाण्डुगुडाश्वत्थपाञ्चालाः । साकेतकङ्ककुरुकालकोटिकुकुराश्च पारियात्रनगः । औदुम्बरकापिष्ठलगजाह्वयाश्चेति मध्यमिदम् ३।४।५। अथ २पूर्वस्यामञ्जनवृषभध्वजपद्ममाल्यवद्गिरयः । व्याघ्रमुखसुह्मकर्वटचान्द्रपुराः शूर्पकर्णाश्च । खसमगधशिबिरगिरिमिथिलसमतटोड्राश्ववदनदन्तुरकाः । प्राग्ज्योतिषलौहित्यक्षीरोदसमुद्रपुरुषादाः । उदयगिरिभद्रगौडकपौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः । एकपदताम्रलिप्तिककोशलका वर्धमानश्च ६।७।८ । आग्नेय्यां ३दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः । शौलिकविदर्भवत्सान्ध्रचेदिकाश्चोर्ध्वकण्ठाश्च । वृषनालिकेरचर्मद्वीपा विन्ध्यान्तवासिनस्त्रिपुरा । श्मश्रुधरहेमकूटव्यालग्रीवा महाग्रीवाः । किष्किन्धकण्टकस्थलनिषादराष्ट्राणि पुरिकदाशार्णाः । सह नग्नपर्णशवरैराश्लेषाद्ये ९।१०।११। त्रिके देशाः । अथ दक्षिणेन ४लङ्का कालाजिनसौरिकीर्णतालिकटाः । गिरिनगरमलयदर्दुरमहेन्द्रमालिन्द्यभरुकच्छाः । कङ्कटटङ्कणवनवासिशिविकफणिकारकोङ्कणाभीराः । आकरवेणावत्तकदशपुरगोनर्दकेरलकाः । कर्णाटमहाटविचित्रकूटनासिक्यकोल्लगिरिचोलाः । क्रौञ्चद्वीपजटाधरकावेर्यो रिष्यमूकश्च । वैदूर्यशङ्खमुक्तात्रिवारिचरधर्मपट्टनद्वीपाः । गणराज्यकृष्णवेल्लूरपिशिकशूर्पाद्रिकुसुमनगाः । तुम्बवनकार्मणेयकयाम्योदधितापसाश्रमा ऋषिकाः । काञ्चीमरुचीपट्टनचेर्य्यार्यकसिंहला ऋषभाः । बलदेवपट्टनं दण्डकावनतिमिङ्गिलाशना भद्राः । कच्छोऽथ कुञ्जरदरी सताम्रपर्णीति विज्ञेयाः १२।१३।१४। नैरृत्यां दिशि५ देशाः पह्लवकाम्बोजसिन्धुसौवीराः । बडवामुखारवाम्बष्ठकपिलनारीमुखानर्ताः । फेनगिरियवनमाकरकर्णप्रावेयपारशवशूद्राः । वर्वरकिरातखण्डक्रव्यादाभीरचञ्चूकाः । हेमगिरिसिन्धुकालकरैवतकसुराष्ट्रबादरद्रविडाः । स्वात्याद्ये भत्रितये १५।१६।१७। ज्ञेयश्च महार्णवोऽत्रैव । अपरस्यां ६मणिमान् मेघवान् वनौघः क्षुरार्पणो ऽस्तगिरिः । अपरान्तकशान्तिकहैहयप्रशस्ताद्रिवोकाणाः । पञ्चनदरमठपारततारक्षितिजृङ्गवैश्यकनकशकाः । निर्मर्यादा म्लेच्छा ये पश्चिमदिक्स्थितास्ते च १८।१९।२० । दिशि ७पश्चिमोत्तरस्यां माण्डव्यतुषारतालहलमद्राः । अश्मककुलूतलहडस्त्रीराज्यनृसिंहवनखस्थाः । वेणुमती फल्गुलुका गुरुहा मरुकुच्चचर्मरङ्गाख्याः । एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च २१। २२।२३ । उत्तरतः ८कैलासो हिमवान्वसुमान् गिरिर्धनुष्मांश्च । क्रौञ्चो मेरुः कुरवस्तथोत्तराः क्षुद्रमीनाश्च । कैकयवसातियामुनभोगप्रस्थार्जुनायनाग्नीध्राः । आदर्शान्तर्द्वीपित्रिगर्ततुरगाननाश्वमुखाः । केशधरचिपिटनासिकदासेरकवाटधानशरधानाः । तक्षशिलापुष्कलावतकैलावतकण्ठधानाश्च । अम्बरमद्रकमालवपौरवकच्छारदण्डपिङ्गलकाः । माणहलहूणकोहलशीतकमाण्डव्यभूतपुराः । गान्धारयशोवतिहेमतालराजन्यखचरगव्याश्च । यौधेयदासमेयाः श्यामाकाः क्षेमधूर्ताश्च २४,२५,२६, । ऐशान्यां ९ मेरुकनष्टराज्यपशुपालकीरकाश्मीराः । अभिसारदरदतङ्गणकुलूतसैरिन्ध्रवनराष्ट्राः । ब्रह्मपुरदार्वडामरवनराज्यकिरातचीनकौलिन्दाः । भल्लापलोलजटासुर कुनठखषघोषकुचि(वि)काख्याः । एकचरणानुविश्वाः सुवर्णभूर्वसुवनं दिविष्ठाश्च । पौरवचीरनिवसनत्रिनेत्रमुञ्जाद्रिगन्धर्वाः २७।१।२। वर्गैराग्नेयाद्यैः क्रूरग्रहपीडितैः क्रमेण नृपाः । पाञ्चालो मागधिकः कालिङ्गश्च क्षयं यान्ति । आवन्तोऽथानर्तो मृत्युं चायाति सिन्धुसौवीरः । राजा च हारहौरो मद्रेशोऽन्यश्च कौलिन्दः" ।

**कूर्म्मपृष्ठ** न० कूर्म्मस्य पृष्ठमिव । १शरावे २अम्लानवृक्षे च पु० शब्दच० । ६त० । कूर्म्मस्य पृष्ठे न० 

**कूर्म्मराज** पु० कूर्म्माणां राजा श्रेष्ठत्वात् टच् समा०, कूर्म्मरूपेण राजते राज—अच् वा । कूर्म्मरूपे भगवदवतारे जटा० । "पृथ्वि ! स्थिरा भव भुजङ्गम । धारयैनां त्वं कूर्म्मराज ! तदिदं द्वितयं दधीथाः" महना० । २कूर्म्माणां श्रेष्ठे च

**कूल** आवृतौ भ्वा० पर० सक० सेट् । कूलति अकूलीत् चुकूल प्रनिकूलति कूलम् । "तासां प्राजमानो योनिमकूलयत्" टत० ब्रा० ४९ ।

**कूल** न० कूलति आवृणोति जलप्रवाहम् कूल—अच् । नद्यादेस्तीरे । "नदीकूलं यथा वृक्षः" मनुः "नदीवोभयकूलभाक्" रघुः । "चुकूज कूले कलहंसमण्डली" नैष० । कर्म्मणि घञर्थे क । २स्तूपे ३तडागे ४सैन्यपृष्ठे च विश्वः